# চিপিটকচর্বণম্

## নমুনা প্রশ্ন ও উত্তর

### প্রথমপর্ব

১। কেন বিরচিতম্ চিপিটকচর্বণম্ ইতি প্রহসনম্?
- সিদ্ধগৌতমকূলোদ্ভবাচার্যপঞ্চাননতর্করত্নাত্মজেন শ্রীজীবন্যায়তীর্থেন বিরচিতম্ চিপিটকচর্বণম্ ইতি প্রহসনম্।
২। অস্য প্রহসনস্য নান্দীশ্লোকে কস্যা স্তুতিঃ বিহিতা?
- অস্য শ্লোকস্য নান্দীশ্লোকে দেব্যাঃ মহাকাল্যাঃ স্তুতিঃ বিহিতা।
৩। অস্য প্রহসনস্য নান্দীশ্লোকে কেন উপায়েন মহাকাল্যাঃ স্তুতিঃ বিহিতা?
- অস্য প্রহসনস্য নান্দীশ্লোকে 'চূতাষ্ঠিতুল্যচিপিটায়িতগণ্ডদেশা চণ্ডক্রিয়ারুচিরখণ্ডিতহাস্যলেশা কুপ্যৎকপালিনয়নানল সামিধেনী ক্ষণধূতবেণিঃ গণবধূঃ বঃ পুষ্পাতু' ইতি প্রকারেণ মহাকাল্যাঃ স্তুতিঃ বিহিতা।
৪। অস্য প্রহসনস্য নান্দীশ্লোকে বন্দিতা মহাকাল্যাঃ গণ্ডদেশঃ কীদৃশঃ?
- অস্য প্রহসনস্য নান্দীশ্লোকে বন্দিতা মহাকাল্যাঃ গণ্ডদেশঃ চূতাষ্ঠিতুল্য চিপিটায়িতঃ।
৫। অস্য প্রহসনস্য প্রয়োগনির্বাহায় সূত্রধারেণ কঃ আহূতঃ?
- অস্য প্রহসনস্য প্রয়োগনির্বাহায় সূত্রধারেণ বিদূষকঃ আহূত।
৬। 'সর্বজনহর্ষজনকং কিমপ্যপূর্বং প্রহসনম্' ইত্যত্র প্রহসনস্য নাম কিম্?
- 'সর্বজনহর্ষজনকং কিমপ্যপূর্বং প্রহসনম্' ইত্যত্র প্রহসনস্য নাম সিদ্ধগৌতমকূলোদ্ভবাচার্যপঞ্চাননতর্করত্নাত্মজেন শ্রীজীবন্যায়তীর্থেন বিরচিতম্ **চিপিটকচর্বণম্** ইতি।
৭। কস্মিন্ পর্বণি চিপিটকচর্বণম্ ইতি প্রহসনস্য প্রয়োগো হভূৎ?
- কোজাগরপর্বদিবসে 'চিপিটকচর্বণম্' ইতি প্রহসনস্য প্রয়োগো হভূৎ।
৮। বিদূষকস্য কুটুম্বিন্যা কিং কারিতম্?
-দারিদ্রদুঃখনিবারণার্থং বলাৎকারেণ বিদূষকস্য কুটুম্বিন্যা নারিকেলখণ্ডমিশ্রিতং চিপিটকচর্বণং কারিতো বিদূষকঃ।
৯। কিমর্থং ধন্যঃ আসীৎ বিদূষকঃ?
- বিদূষকঃ ধন্যঃ আসীৎ যতঃ বিদূষকস্য পত্নী বলাৎ বিদূষকং চিপিটকচর্বণং কারয়িত্বা ছলাৎ তন্নামকং কিমপি সূত্রধারং স্মারয়তি। যৎ প্রহসনং বঙ্গীয়েনাচার্যপঞ্চাননতর্করত্নতনূজন্মনা শ্রীজীবন্যায়তীর্থশর্মণা বিনির্মায় সদ্যঃ প্রয়োগায় সূত্রধারায় সমর্পিতম্।
১০। 'অহমপ্যস্য দর্শনপথং পরিহরামি' কস্য উক্তিরিয়ম্? কিমর্থং বিদূষকসূত্রধারৌ দর্শনপথং পরিহৃতবন্তৌ?
- 'অহমপ্যস্য দর্শনপথং পরিহরামি' চিপিটকচর্বণম্ ইতি প্রহসনে সূত্রধারস্য উক্তিরিয়ম্।
বিদূষকসূত্রধারয়োঃ সম্মুখে কপালী নাম্না কোহপি মহাকৃপণঃ আগচ্ছন্ অস্তি। কৃপণস্য কপালিনঃ মুখমপি দ্রষ্টুং নেচ্ছন্তৌ বিদূষকসূত্রধারৌ কপালিনঃ নয়নপথং পরিহৃতবন্তঃ।
১১। 'অহম্ উদ্বন্ধনেন প্রাণাংস্ত্যক্ষামি' কস্য উক্তিঃ? কিমর্থং সঃ উদ্বন্ধনেন প্রাণান্ ত্যক্তুম্ ইষ্টবান্?
- শ্রীজীবন্যায়তীর্থবিরচিত চিপিটকচর্বণং নাম প্রহসনে কপালী নাম মহাকৃপণস্য উক্তিরিয়ম্।
তৎপিতামহস্মৃতিপূতং পিতুঃ নিধিভূতং ছিদ্রশতভূষিতং ছত্রং তস্য কুব্জপৃষ্ঠয়া দাস্যা মন্থরয়া পথি বিনিক্ষিপ্তম্। তস্মাৎ কারণাৎ মহামনঃকষ্টেন কপালী গৃহে অবস্থাতুং অশক্তঃ সন্ উদ্বন্ধনেন প্রাণান্ ত্যক্তুম্ ইষ্টবান্।
১২। কিং নাম কপালিনঃ? তৎপতিঃ কথং তয়া বর্ণিতঃ?
-শ্রীজীবন্যায়তীর্থবিরচিত চিপিটকচর্বণং নাম প্রহসনে কপালিনঃ ভার্যায়াঃ নাম রঙ্গিণী ইতি। কলহে চতুর্মুখঃ তাড়নে চ চতুর্ভুজঃ ইতি ব্রহ্মবিষ্ণুস্বরূপী তৎপতিঃ ইত্যেবং তয়া বর্ণিতঃ পতিঃ।
১৩। কথং রঙ্গিণী কপালিনঃ পুরতঃ রজ্জুং প্রক্ষিতবতী?
- কপালিনঃ পিতামহস্মৃতিপূতং পিতুঃ নিধিভূতং ছিদ্রশতভূষিতং ছত্রং তস্য কুব্জপৃষ্ঠয়া দাস্যা মন্থরয়া পথি বিনিক্ষিপ্তম্। তস্মাৎ কারণাৎ মহামনঃকষ্টেন কপালী গৃহে অবস্থাতুং অশক্তঃ সন্ উদ্বন্ধনেন প্রাণান্ ত্যক্তুম্ ইষ্টবান্। তদর্থম্ আত্মানং উদ্বধ্নাতুং রজ্জুমেকাং গৃহিণ্যৈ যাচিতবান্। তস্মাৎ কারণাৎ রঙ্গিণী রজ্জুমেকাং কপালিনঃ পুরতঃ প্রক্ষিতবতী।
১৪। কিং নাম কীদৃশশ্চ কপালিনঃ দাসঃ? কিং নাম কীদৃশী চ কপালিনঃ দাসী?
- শ্রীজীবন্যায়তীর্থবিরচিত চিপিটকচর্বণং নাম প্রহসনে কপালিনঃ দাসস্য নাম পঙ্গুরাম ইতি। খঞ্জ এব সঃ। কপালিনঃ দাস্যাঃ নাম মন্থরা ইতি। সা চ কুব্জা।
১৫। পত্যুঃ মরণে রঙ্গিণ্যাঃ কা অবস্থা ভবিষ্যতি?

- পত্যুঃ কপালিনঃ মরণে সতি তস্য গৃহিনী রঙ্গিণী বিধবা ভবিষ্যতি। কিন্তু ইদানীং সধবা অপি সা ন স্বর্গে নিবসতি পত্যুঃ মরণে ন বা পাতালং যাস্যতি ইতি রঙ্গিণ্যাঃ মতম্।

১৬। পত্যুঃ আজ্ঞা অলঙ্ঘনীয়া ইতি বিচার্য কপালিনঃ গৃহিনী কিং কৃতবতী ?

- কপালিনঃ পিতামহস্মৃতিপূতং পিতুঃ নিধিভূতং ছিদ্রশতভূষিতং ছত্রং তস্য কুব্জপৃষ্ঠয়া দাস্যা মন্থরয়া পথি বিনিক্ষিপ্তম্। তস্মাৎ কারণাৎ মহামনঃকষ্টেন কপালী গৃহে অবস্থাতুং অশক্তঃ সন্ উদ্বন্ধনেন প্রাণান্ ত্যক্তুম্ ইষ্টবান্। তদর্থম্ আত্মানং উদ্বধ্নাতুং রজ্জুমেকাং গৃহিণ্যৈ যাচিতবান্। পত্যুঃ আজ্ঞা অলঙ্ঘনীয়া ইতি বিচার্য কপালিনঃ গৃহিনী রঙ্গিণী রজ্জুমেকাং কপালিনঃ পুরতঃ প্রক্ষিতবতী।

১৭। কস্যাঃ স্পর্ধয়া মন্থরা ছত্রং পথি নিক্ষেপবতী ?

- গৃহিণ্যাঃ রঙ্গিণ্যাঃ স্পর্ধয়া কুব্জপৃষ্ঠয়া ধৃষ্টয়া দাস্যা মন্থরয়া গৃহকর্তুঃ শতছিদ্রং ছত্রং পথি নিক্ষেপবতী।

১৮। মন্থরাপঙ্গুরাময়োঃ নাটকে প্রবেশো কথং ভবতি ?

-যষ্ঠ্যা পরস্পরং তাড়য়ন্তৌ মন্থরাপঙ্গুরাময়োঃ নাটকে প্রবেশো ভবতি।

১৯। কিমর্থং পঙ্গুরামঃ মন্থরাং তাড়য়তি স্ম ?

- গৃহস্বামিনঃ কপালিনঃ কার্যং ন কৃত্বা মন্থরা নিদ্রয়া কালং যাপয়তি স্ম। পঙ্গুরামঃ যদৈব উক্তবান্ তদৈব সা মন্থরা দণ্ডেণ তং তাড়য়িতুং প্রবৃত্তা। ততঃ আত্মরক্ষার্থং পঙ্গুরামঃ দণ্ডং ধৃতবান্ কিন্তু তাং ন তাড়িতবান্।

২০। কপালিনঃ পাদুকাযুগলং কঃ পথি নিক্ষিপ্তবান্ ?

পঙ্গুরামঃ কপালিনঃ পাদুকাযুগলং পথি নিক্ষিপ্তবান্।